# केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)

56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली – 110058

दूरभाषसङ्ख्या – 011 -28524993, 28524995, 28520979, 28520966

अन्तर्जालपुटम् - www.sanskrit.nic.in


**अधिसूचनायाःसंख्या - के.सं.वि./36014/विज्ञापनम्/एस्-III/2024-25/01** **दिनाङ्कः 05.05.2024**

## ‘आदर्शयोजना 2022’ द्वारा वित्तीयसहायताप्रदानार्थं संस्कृतसंवर्धनयोजनानां च माध्यमेन वित्तीयसहायताप्रदानार्थं वित्तवर्षं 2024-25 कृते अन्तर्जालमाध्यमेन आवेदनपत्राणाम् आमन्त्रणम्

संस्कृतस्य संवर्धनाय केन्द्रीयसंस्कृतविश्वविद्यालयेन सञ्चाल्यमानाः भारतसर्वकारस्य शिक्षामन्त्रालयस्य अधोलिखिताः केन्द्रीययोजनाः उपलक्ष्य 2024-25 वर्षस्य कृते वित्तीयसहायतायाः प्रदानार्थं नियमानुसारं सर्वकारेतरसंस्थाभिः/ स्वैच्छिकसङ्घटनैः/ संस्थाभिः/ विश्वविद्यालयैः/ प्रकाशकैः/ वैयक्तिकरूपेण/ छात्रद्वारा अन्तर्जालमाध्यमेन आवेदन-पत्राणाम् आमन्त्रणं क्रियते –

| क्र. सङ्ख्या | योजनायाः नाम | अन्तर्जालमाध्यमेन पञ्जीकरणम् | |
|---|---|---|---|
| | | आरम्भतिथिः | अन्तिमतिथिः |
| 1. | आदर्शसंस्कृतमहाविद्यालयः (ASMs)/आदर्शशोधसंस्थानम् (ASSSs) – 2022 इति योजनान्तर्गते संस्थाभ्यः मान्यताप्रदानार्थं CSU/Ad/Revised Scheme/2023-24/01 दिनांकः - 05.03.2024 इत्यधिसूचनानुसारेण सोसायटी – पञ्जीकरण – अधिनियम 1983 द्वारा ‘सोसायटी’ रूपेण पञ्जीकृतानि स्वैच्छिकसङ्धटनानि अथवा ‘ट्रस्ट’ – अधिनियमद्वारा पञ्जीकृताः न्यासाः उत कम्पनी – अधिनियमद्वारा पञ्जीकृता अलाभप्रयोजना कम्पनी, ये च इतः परं ‘मूलनिकाय’ – पदेन अभिधास्यन्ते, अपि च संस्कृतमहाविद्यालयानाम् अथवा संस्कृतशोधसंस्थानानां संरक्षणं कुर्वतीभ्यः संस्थाभ्यः मान्यताप्रदानार्थं ‘आदर्शसंस्कृतमहाविद्यालयः (ASMs)/ आदर्शसंस्कृतशोधसंस्थानम् (ASSSs) – 2022’ इत्यस्य खण्डः – 6 इत्यनुसारेण विश्वविद्यालयद्वारा आवेदनानि आमन्त्र्यन्ते। | 10.05.2024 | 30.06.2024 |
| 2. | **संस्कृतशिक्षणम्** - पारम्परिकसंस्कृतपाठशालासु/ महाविद्यालयेषु/ सर्वकारीयविद्यालयेषु/ चतुष्पाठिसंस्थासु शिक्षणार्थं संस्कृताध्यापकानाम् अथवा आधुनिकविषयकाध्यापकानां व्यवस्था तथा आवासीयच्छात्रवृत्तिश्च। | | |
| 3. | **सम्मानराशिः -** अभावग्रस्तपरिस्थितिषु वर्तमानानां संस्कृतपण्डितानां कृते वार्षिकवृत्तिः। | | |
| 4. | **संस्कृतसंवर्धनाय कार्यक्रमाः गतिविधयश्च -** विभिन्नसंस्कृतसंवर्धनकार्यक्रमाणाम् आयोजनार्थं वित्तीयसहायता। | | |
| 5. | **संस्कृतपुस्तकानां प्रकाशनं सामूहिकक्रयणं दुर्लभग्रन्थानां पुनर्मुद्रणञ्च** | | |
| 6. | **शास्त्रचूडामणिः -** संस्कृतशास्त्रशिक्षणार्थं शास्त्रविदुषाम् अथवा सेवानिवृत्तानां संस्कृतविदुषां सेवानाम् उपयोगः। | | |
| 7. | **व्यावसायिकप्रशिक्षणम् -** पञ्जीकृतासु पारम्परिकसंस्कृतसंस्थासु अध्ययनरतानां छात्राणां कृते व्यावसायिकप्रशिक्षणम्। | | |
| 8. | **छात्रवृत्तिः -** पारम्परिक-आधुनिकधारासु नियमितरूपेण नवमीकक्षातः विद्यावारिधिपर्यन्तं संस्कृतम्/ पालिं/ प्राकृतम् अधीयानेभ्यः छात्रेभ्यः छात्रवृत्तिः। | 10.05.2024 | 15.09.2024 |

## अवधातव्याः निर्देशाः

I. **उपर्युक्तानां योजनानां कृते आवेदनं केवलम् अन्तर्जालमाध्यमेनैव (Online mode only) स्वीक्रियते। अन्येन माध्यमेन प्राप्तानि आवेदनानि न स्वीक्रियन्ते।**

II. योजनायाः दिशानिर्देशानुसारं प्रकाशनसामग्र्यः/ पुस्तकानि/ अनिवार्यपत्राणि सक्षमाधिकारिणा प्रमाणितस्य अन्तर्जाले प्रपूरितस्य आवेदनपत्रस्य प्रतिलिप्या सह पृथग्रूपेण प्रेषणीयानि। आवेदनपत्रस्य अनुलग्नकाणां च सर्वपृष्ठेषु आवेदकेन हस्ताक्षरम् अवश्यं विधेयम्। सर्वेषां पत्राणां स्वसत्यापनम् अपरिहार्यम्।

III. पूर्णरूपेण प्रपूरितस्य आवेदनपत्रस्य छायाप्रतिः पञ्जीकरणस्य अन्तिमतिथेः 20 दिवसाभ्यन्तरे "निदेशकः (केन्द्रीययोजनाः), (.....योजनायाः नाम....), केन्द्रीयसंस्कृतविश्वविद्यालयः, 56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली -110058" इति अनिवार्यतया प्राप्ता भवेत्।

IV. आवेदनपत्रस्य प्रपूरणात् प्राक् योजनानां दिशानिर्देशाः अवश्यं पठनीयाः।

V. प्रत्येकं योजनायाः दिशानिर्देशाः, आवश्यकपत्राणि, मानदेयराशिः, अन्तर्जालमाध्यमेन आवेदनप्रक्रिया, आवेदनपत्रस्य अग्रेसरणप्रक्रिया इत्यादीनां विषये विस्तृतज्ञानार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य अन्तर्जालपुटम् www.sanskrit.nic.in/schemes अवलोकयन्तु।

VI. उपर्युक्ताः क्रमसंख्या 2 तः पर्यन्तं प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहायतां प्राप्तुं प्रतिवर्षं पृथग् रूपेण आवेदनं कर्तव्यम्। योजनायाः नियमानुसारं विगतवर्षेषु प्राप्तानाम् आवेदनानां स्वतः नवीनीकरणं न सम्भवति।

VII. आवेदनानां स्वीकृतिः अथवा तिरस्कृतिः धनस्य उपलब्धताम् आधारीकरोति। अतः प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहायतायाः निमित्तं पृथक्तया आवेदनं समर्पणीयं भवति।

VIII. कस्याः अपि योजनायाः विषये स्पष्टीकरणार्थम् अथवा संशयनिवारणार्थम् उपरि प्रदत्तदूरभाषसङ्ख्यया अथवा पत्राचारसङ्केतद्वारा उत ई-मेल help.schemes@csu.co.in माध्यमेनवा सम्पर्कयितुं शक्नुवन्ति।

हस्ता/-

कुलसचिवः प्र.